International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(6): 198-201
© 2016 IJSR
www.anantaajournal.com
Received: 13-09-2016
Accepted: 14-10-2016

**डॉ. सुशान्तकुमारराज:**
सहाचार्य:, साहित्यविभाग:, राष्ट्रिय-संस्कृत-संस्थानम् (मा.वि.) श्रीसदाशिवपरिसर:, पुरी, ओडिशा, भारत।

**Correspondence**
**डॉ. सुशान्तकुमारराज:**
सहाचार्य:, साहित्यविभाग:, राष्ट्रिय-संस्कृत-संस्थानम् (मा.वि.) श्रीसदाशिवपरिसर:, पुरी, ओडिशा, भारत।

# अनेकार्थकस्य शब्दस्य वाचकत्वे नियन्त्रणनियमा:

**डॉ. सुशान्तकुमारराज:**

**प्रस्तावना**

'स्याद्वाचको लाक्षणिक: शब्दोत्र व्यञ्जकस्त्रिधा'१ इति काव्यशास्त्रीयनियमाधारेण वाचक:, लाक्षणिक:, व्यञ्जकश्चेति त्रिधा विभज्यते। तथैवात्र काव्यव्यवहारे अर्थोऽपि वाच्यार्थ:, लक्ष्यार्थ:, व्यग्ङ्ग्यार्थश्चेति त्रिविधोऽङ्गीक्रियते। शब्दादर्थबोधने काचित् शक्तिरपेक्ष्यते । शब्दत: अर्थागमननिमित्तमङ्गीकृता शक्तिरपि अभिधा, लक्षणा, व्यञ्जना चेति त्रिधा विभज्यते। अत: वाचकशब्दात् अभिधया शक्या वाच्यार्थ:, लाक्षणिकशब्दात् लक्षणया शक्त्या लक्ष्यार्थस्तथा व्यञ्जकशब्दात् व्यञ्जनया व्यङ्ग्यार्थ: प्रतीयते। तच्चोक्तं विश्वनाथकविराजेन स्वकीये साहित्यदर्पणे ग्रन्थे-

> 'वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मत:।
> व्यङ्ग्यो व्यञ्जनया ता: स्युस्तित्र: शब्दस्य शक्तय:२।।' इति।

तत्र का नाम शक्तिरिति जिज्ञासायां नागेशभट्ट: वैयाकरणसिद्धान्तपरमलघुमञ्जूषायां नैयायिकमतं निर्दिशति। स: लिखति– ''तत्र शक्तिरिति क: पदार्थ: इति चेत् ? अत्र तार्किका: अस्मात्पदात् अयमर्थो बोद्धव्य: इत्याकारा, इदं पदमिममर्थं बोधयतु इत्याकारा वेश्वरेच्छा शक्ति: लाघवात् । सैव सङ्केत:, सैव च सम्बन्ध:। शक्ते: यद्यपि विषयत्वलक्षण: सम्बन्ध: पदे, अर्थे, बोधे च, तथापि बोधनिष्ठ-जन्यतानिरूपितजनकतावत्त्वेन शक्तिविषयो वाचक:, पदजन्यबोधविषयत्वेन शक्तिविषयो वाच्य: इति नातिप्रसङ्ग: । यद्यपि प्रथमं शक्तिग्रहो वाक्य एव तथापि आवापोद्वापाभ्यां शास्त्रकृत्कल्पिताभ्यां तत्तत्पदे शक्तिग्रह: इत्याहु: । (शक्तिनिरूपणे) अत्र शक्तिपदेन अभधिा बोद्धव्या।

नैयायिकानामतमिदं खण्डयितुमुपक्रामन् वैयाकरणो नागेशभट्ट: कथयति - तन्न । इच्छाया: सम्बन्धिनोराश्रयतानियामकत्वाभावेन सम्बन्धत्वासम्भवात् । सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामक: इति । तस्मात्पदपदार्थयो: सम्बन्धान्तरम् एव शक्ति:, वाच्य-वाचकभावापरपर्याया। तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम् । (तत्रैव) इयं शक्ति: (अभिधा) रूढि-योग-योगरूढित्वेन त्रिधा विभज्यते । शास्त्रकल्पितावयवार्थज्ञानाभावो यत्र भवति अर्थात् व्याकरण-शास्त्रकल्पितप्रकृतिप्रत्ययान्तर्गत: अर्थबोध: यत्र न भवति, अपि च प्रकृतिप्रत्ययार्थभिन्न: अपर: कश्चित् अर्थ: बुध्यते तत्र रूढि: भवति । यथा मणिनूपुरादय: शब्दा: । यत्र व्याकरणसम्मत: प्रकृतिप्रत्ययगत: अर्थ: बुध्यते तत्र योगो भवति । यथा- पाठकपाचकादय: शब्दा: । यत्र व्याकरणसम्मत: प्रकृति-प्रत्ययगत: अर्थ: वर्तते, अपि च समुदायार्थ: अन्यपरक: भवति, तत्र योगरूढिर्भवति । यथा- पङ्कजादय: शब्दा: । एतद्विहाय अपरे केचन यौगिकरूढशब्दा: सन्ति । प्रकरणवशात् ते कदाचित् योगार्थम्, कदाचित् रूढार्थं प्रकाशयन्ति । यथा- अश्वगन्धादय: शब्दा: । अश्वगन्धादिपदमौषधिविशेषे रूढम् । अश्वसम्बन्धिगन्धवत्तया वाजिशालाबोधे यौगिकम् । एवं मण्डपपदमपि गृहविशेषे रूढम्, मण्डपानकर्तरि गवि शुनि च यौगिकम् ।

तत्र संकेतितार्थस्य बोधनादग्रिमा शक्तिरेव अभिधा नाम इत्यङ्गीक्रियते। अत्र संकेतितार्थो भवति वाच्यार्थ: मुख्यार्थो वेति। स च वाच्यार्थ एक एवेति गण्यते परन्तु व्यङ्यार्थ: अनेको भवितुं शक्यते इति काव्यशास्त्रे सिद्धान्तितम् । प्रसङ्गेऽस्मिन् शंका जायते यत्- संस्कृतवाङ्मये अनेकार्थविशिष्टा: शब्दा वर्तन्ते। तेषामनेकार्थकशब्दानां श्रवणेन अनेके एव वाच्यार्था: सम्भवेयु:। परन्तु नियमानुसारेण प्रत्येकं शब्दस्य एक एव वाच्यार्थ: सम्भवति। तर्हि अनेकार्थकस्य शब्दस्य श्रवणे समुपस्थितेषु अनेकार्थेषु कस्मिन् अर्थे संकेतग्रहो भविष्यति अथवा को वाच्यार्थ: इति। अस्यामवस्थायां समाधानं क्रियते वाग्देवतावतारेणाचार्यमम्मटभट्टेन स्वकीये काव्यप्रकाशे ग्रन्थे-

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्।।३ इति।

अत्र 'नियन्त्रिते' इति नियन्त्रणशब्दस्यार्थः अपरार्थोपस्थापन-प्रतिबन्धः इति । मम्मटस्य अनया युक्त्या ज्ञायते यत् नानार्थशब्दस्थले प्रकरणादिज्ञानाधीनात् तात्पर्यनिर्णयात्प्राकरणिकार्थशाब्दबुद्धौ जातायां सत्यामतात्पर्यार्थविषयापि शाब्दबुद्धिः तस्मादेव शब्दात् जायमाना कस्य व्यापारस्य साध्यतावलम्बताम्, ऋते व्यञ्जनात्। अत एव नानार्थशब्दस्थले प्रकरणादिवशात् अभिधया वाच्यार्थस्य नियन्त्रणे सति अनुरणनीयं व्यञ्जनं शब्दशक्तिमूलमिति ध्वनिसिद्धान्तवादिनः वदन्ति। एतादृशस्थलेषु शब्द-अपरिवृत्तित्वात् शब्दस्य प्राधान्यं जायते । अतः शाब्दीव्यञ्जना-स्थलमिदमस्ति । तच्चोक्तं साहित्यदर्पणे-

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीर्हेतुर्व्यञ्जना साऽविधाश्रया।।४ इति।

नानार्थशब्दस्थले अभिधां नियन्त्रयितुं संयोगादयः चतुर्दश स्वीकृताः सन्ति । अधुना प्रसङ्गवशतः तेषामालोचना विधीयते । अत्र कस्य शब्दस्य कः अर्थः इति अनवच्छेदे अर्थात् तात्पर्यसन्देहे सति तदपाकरणद्वारा संयोगादयः विशेषस्मृतिहेतवः विशेषार्थनिर्णायकाः भवन्ति । अत्र तात्पर्यमिदं यत् यत्र अनेकार्थविशिष्टशब्दाः सन्ति तत्र समकालमर्थद्वयमापतति, सङ्केतग्रहस्य तुल्यत्वात्। अत एव एतादृशस्थले समकालमनेकार्थोपस्थितौ शब्दस्यास्य कस्मिन्नर्थे तात्पर्यमिति सन्देहे सति प्रकरणादिना एकस्यार्थस्य बोधो भवति । प्रकरणादिः सङ्केतितमर्थं बोधयति । अत्रार्थबोधने अभिधाशक्तिरेव हेतुरस्ति । इत्थञ्च 'सुरभिमांसं भवान् भुङ्क्ते' इत्यादिस्थलेषु नानार्थशब्दस्य 'सुरभि' इत्यस्य पदस्य 'सुगन्धि' इत्यर्थः प्रकरणवशात् अभिधया नियन्त्रितो भवति । नियन्त्रणानन्तरं तस्माच्छब्दाद् गवादिरूपार्थस्य या द्वितीया प्रतीतिर्जायते, तत्र गवादेरुपस्थितेरभावात् तादृशी प्रतीतिः व्यञ्जनादृते कदापि न सम्भवति।
एतादृशी अभिधा शक्तिः संयोगादिभिः नानार्थशब्दस्थले एकस्मिन्नर्थे नियम्यत इति न केवलं साहित्यिकानां सिद्धान्तितं मतमस्ति अपि तु वैयाकरणानाञ्चाभिमतं विद्यते। तदुक्तं वैयाकरणाचार्यभर्तृहरिणा स्वकीये वाक्यपदीये ग्रन्थे-

संयोगो विप्रयोगश्च साहचर्यं विरोधिता
अर्थः प्रकरणं लिङ्गःशब्दस्यान्यस्य सन्निधिः ।
सामर्थ्यमौचिती देशः कालो व्यक्तिस्वरादयः
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।।५ इति।

**संयोगविप्रयोगौ-**

संयोगविप्रयोगयोरुदाहरणत्वेन नागेशः 'सवत्साधेनुः', 'अवत्साधेनु'रिति लिखति । अत्र धेनुपदेन नवप्रसूता गौः, महिषी, बड़वा, स्त्रीप्रभृतयः च ज्ञायन्ते, परन्तु वत्ससंयोगात् धेनुरिति पदात् केवलं गौरित्यर्थः नियन्त्रितो भवति। गोः सद्यः लब्धजन्मा शिशुः वत्सः इत्यभिधीयते । एवमपि तद्वियोगेन धेनुपदं गवि नियन्त्रितमस्ति ।
साहित्यिकाः अस्मिन् प्रसङ्गे 'सशङ्खचक्रो हरिः', 'अशङ्खचक्रो हरि'रिति उदाहरन्ति । अत्र शास्त्रार्थप्रसङ्गे जगन्नाथः रसगङ्गाधरे द्वितीयानने सूचयति यत् 'न त्वायुधत्वेनायुधसामान्यसंयोगः, पाशाङ्कुशसंयोगो वा, दलद्वयाभावात्'६ इति। अत्र तात्पर्यमिदं यत् हरिशब्दस्य विष्णुः, इन्द्रः, सूर्यः, सर्पः, भेकः, शुकः चेत्यादिरूपेण नाना अर्थाः सन्ति। अत्र शङ्खचक्रसंयोगेन हरिपदम् अन्यत्र नियन्त्रितं न भवत् केवलं विष्णौ नियन्त्रितं भवति । यदि कश्चित् वदेत् चक्रं तावत् आयुधविशेषम् । अतः सायुधः हरिः इत्युच्यते चेत् हरिपदेन विष्णुः इत्यर्थः नियन्त्रितः भवतु, तर्हि तन्न । कारणमिन्द्रादिरपि कदाचित् आयुधधारणं करोति । अतः प्रसिद्धसंयोगाभावात् अत्र हरिपदं विष्णुं न बोधयेत् । एवं पाशाङ्कुशसहितः हरिः इत्युच्यते चेत् तथापि हरिपदं न विष्णुवाचकम् । असाधारणत्वाभावात् स्थलमिदं न लिङ्गान्तर्गतं भवितुमर्हति । शङ्खचक्रयोः इन्द्रादिनापि कदाचित् धारणसम्भवात् । एवमपि अशङ्खचक्रो हरिः इति विप्रयोगस्य स्थलमिति साहित्यिकाः।

**साहचर्यम्-**

साहचर्यस्य उदाहरणं प्रस्तुतं काव्यप्रकाशे 'रामलक्ष्मणौ' इति । अस्मिन् स्थले साहचर्यमिति शब्दस्य अर्थो भवति सादृश्यम्, 'सादृश्ययोरेव सह प्रयोगः इति नियमात्' इति नागेशभट्टः। पण्डितराजजगन्नाथः सूचयति साहचर्यस्यार्थः परस्परापेक्षित्वमुच्यते चेत् तर्हि तन्न । यतो हि 'रामघटौ' इति स्थलेऽपि घटसाहचर्यात् नानार्थस्य रामपदस्य नियन्त्रणमभिधया सम्भवेत्, अर्थात् रामपदस्य यस्मिन् कस्मिन् अर्थेऽपि श्रोतुः ज्ञानं स्यात् । यद्युच्यते सर्वेषु कार्येषु परस्परापेक्षित्वं साहचर्यमिति, तर्हि रामलक्ष्मणयोः साहचर्यं परस्परवैयक्तिककार्ये न भवतीति हेतोः अभिधया अर्थनियन्त्रणं न भवेत्।
किञ्च यद्युच्यते साहचर्यं नाम प्रसिद्धः सम्बन्धः इति। स च सम्बन्धः एकजन्य-दाम्पत्य-जन्यजनकभाव-स्वामिभृत्यभाव-स्वस्वामिभावादि-रनेकविधः इति, तर्हि एतदपि नैव सम्पद्यते । यतो हि एतदनुसारेण रामलक्ष्मणौ, सीतारामौ, रामदशरथौ, रामहनुमन्तौ, रामायोध्ये इत्यादौ साहचर्य-नियामकत्वस्य सम्भवेऽपि लक्ष्मणसम्बन्धापेक्षया चक्रादिसम्बन्धस्यापृथक्तया सशङ्खचक्रः इत्यादौ अपि साहचर्यस्य प्रसक्तिः भवेत् अर्थात् साहचर्यं नाम प्रसिद्धः सम्बन्धः इत्युच्यते चेत् सशङ्खचक्रो हरिः इत्यत्रापि प्रसिद्धसम्बन्धमाश्रित्य स्थलमिदं साहचर्यस्य उदाहरणं भवेत्।
यद्युच्यते यत्र सम्बन्धः संयोगरूपः तत्र संयोगस्थलम्, यत्र च सम्बन्धान्तरं तत्र साहचर्यस्य स्थलमिति, तर्हि तदपि न। यतो हि संयोगसम्बन्धस्य अन्यसम्बन्धात् पृथक्करणमसम्भवम् । सर्वे सम्बन्धाः सम्बन्धत्वमाश्रित्य समानाः एव। अतः उक्तम् 'संयोगस्यैव पृथक्कारे बीजाभावात्' इति।
यद्युच्यते यत्र संयोगस्य स्वशब्देन प्रकाशनं तत्र संयोगस्य, यत्र च सम्बन्धमात्रम्, न तु सम्बन्धः तत्र साहचर्यस्थलमस्तु । एतेन 'सशङ्खचक्रो हरिः' इत्यत्र संयोगस्य शब्दोपात्तत्वात् संयोगस्थलम्, 'रामलक्ष्मणौ' इति साहचर्यस्य स्थलमिति, तर्हि एतदपि न । यतो हि सलक्ष्मणो रामः विलक्ष्मणो रामः इति स्थलेऽपि प्रोक्तनियमानुसारेण संयोगस्य विप्रयोगस्य च स्थलं स्यात् । अथवा सशङ्खचक्रो हरिः इत्यपि साहचर्यस्य स्थलं स्यात् । तर्हि संयोग-साहचर्ययोः का संज्ञा भवेदिति जिज्ञासायां जगन्नाथः सूचयति, यत्– संयोगशब्दस्य सम्बन्धसामान्यपरतया यत्र शब्दोपात्तं प्रसिद्धं सम्बन्धसामान्यमभिधानियामकं भवति तत्र संयोगस्य स्थलम्, यत्र तु द्वन्द्वादिगतसम्बन्धी एव केवलः तत् साहचर्यस्य स्थलमिति प्राचामाशयः । एवं सगाण्डीवः अर्जुनः इति संयोगस्य, गाण्डीवार्जुनौ इति साहचर्यस्य उदाहरणम् ।

**विरोधिता–**

विरोधितायाः उदाहरणप्रसङ्गे नागेशः 'रामार्जुनगतिस्तयोः' इति निर्दिशति । नानार्थरामशब्दस्य अर्जुनशब्दस्य च परस्परविरोधितया परशुरामसहस्रार्जुनयोरभिधा नियन्त्रयति । तदनुसारेण मम्मटाचार्योऽपि तदेव उदाहरणं समुपस्थापयति। परन्तु प्रसङ्गेऽस्मिन् जगन्नाथः सूचयति, विरोधिता नाम प्रसिद्धं वैरम्, सहानवस्थानञ्चेति। तत्राद्यस्य उदाहरणं 'रामार्जुनौ' इति प्राचीनाः वदन्ति । प्राचीनानां मतमिदं खण्डयितुमप्पय्यदीक्षितः कथयति रामार्जुनयोः बध्यघातकभावविरोधात् परशुरामसहस्रार्जुनयोरभिधानियम्यते इति यदुच्यते तन्न । रामपदस्य नियमनमभिधया परशुरामे यदा भवति तदा तद्विरोधप्रतिसन्धानेन अर्जुनपदस्य कार्तवीर्यार्जुने अभिधानियन्त्रणं भवति। एवञ्च अर्जुनपदस्य अभिधया कार्तवीर्ये नियन्त्रिते तद्विरोधि प्रति सन्धानेन रामपदस्य परशुरामे इति अन्योन्याश्रयदोषो भवति । अतः उभयोः विरोधिनोः मध्ये एकस्य व्यवस्थितार्थत्वं भवेच्चेत् अन्योन्याश्रयः दोषः न स्यात् । अत एव रामरावणौ इति विरोधितायाः उदाहरणं समीचीनम् । अत्र नानार्थः रामशब्दः, रावणशब्दश्च व्यवस्थितार्थः अस्ति । जगन्नाथः कथयति यत् दीक्षितस्य युक्तिरियं न समीचीना । रामलक्ष्मणौ इति

स्थलवत् अत्रापि साहचर्यस्य उदाहरणं भवितुमर्हति । यथा भ्रातृसम्बन्धत्वेन अथवा एकजन्यसम्बन्धत्वेन रामलक्ष्मणयो: सम्बन्ध: प्रसिद्धस्तथा शत्रो: सम्बन्ध: अपि लोकप्रसिद्ध: । अस्मात्कारणात् दीक्षितस्य युक्ति: न चतुरस्रा । विरोधिताया: स्थले अन्यतरपदस्य व्यवस्थितार्थत्वं भवेदिति यदुक्तं दीक्षितेन तदपि न, यतो हि हरिनाशस्य इत्यादिस्थले व्यवस्थितार्थत्वस्य अभावेऽपि एकवद्भावाभिव्यक्तेन विरोधेन विरोधिता ज्ञेया भवति । अत्र तात्पर्यमिदं यत् ययो: विरोध: शाश्वतिक: इति पाणिन्यनुसारेण शाश्वतविरोधस्थले एकवचनं भवति । अत्र हरिश्च नागश्च हरिनागम् (सिंह: हस्ती च) इति एकवचनेन विरोध: ज्ञायते । अत्र न किमपि पदं व्यवस्थितार्थमस्ति। अत: दीक्षितस्य युक्ति: न समीचीना इति । सहानवस्थानमिति द्वितीयविरोधिताया: उदाहरणं छायातपौ इति ।

**अर्थ:–**

अर्थो भवति प्रयोजनम् । एतस्योदाहरणे नागेशभट्टो वदति, 'अञ्जलिना जुहोति' 'अञ्जलिना सूर्यमुपतिष्ठते' इत्यत्र जुहोतीत्यादिपदार्थवशात् अञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वमिति । अत्र तात्पर्यमिदं यत् प्रथमवाक्ये 'जुहोति' इति विशिष्टकार्यमिमित्तम् अञ्जलिपदस्यार्थ: गोलाकार-गभीरात्मकमुद्रायुक्तहस्ताग्रभाग: इति । द्वितीयवाक्ये उपतिष्ठते इति कार्यनिमित्तम् (उपासना इति निमित्तम्) अञ्जलिपदस्यार्थ: हस्तद्वयस्य संयुक्ताकारत्वमिति ।

मम्मटभट्टप्रमुखा: साहित्यिका: अस्मिन् स्थले 'स्थाणुं भजभवच्छिदे' इत्युदाहरन्ति। अत्र संसारबन्धनच्छेदनाय नानार्थस्थाणुशब्द: अभिधया शिवे नियम्यते । शिव एव संसारान्मुक्तिं दातुं समर्थ:, न तु शाखाविहीन: वृक्ष: । यदि कश्चन वदेत् भवच्छेदनं तावत् शिवस्यासाधारण: धर्म:, न तु शाखाहीनस्य वृक्षस्य, अत: अत्र विद्यमान: अभिधानियन्त्रक: अर्थ: लिङ्गान्तर्गत: भवतु । लिङ्गस्थलेऽपि लिङ्गस्य लक्षणमसाधारण: धर्म: इति स्वीक्रियते । तर्हि अस्योत्तरे जगन्नाथेन प्रतिपादितं यत् उक्तस्य विशिष्टधर्मस्य शाब्दबोधोत्तरभाविमानसबोधविषयत्वेन प्रकृतशाब्दबोधाविषय-त्वाल्लिङ्गतोऽर्थस्य भेद: अस्ति । अत्र तात्पर्यमिदं यत्- शिवस्य यत् भवच्छेदकर्तृत्वमस्ति तत्साक्षात् शाब्दबोधे न भवति । शाब्दबोधानन्तरम् अन्य: एक: मानसबोध: अमुमर्थं प्रकाशयति । लिङ्गस्थले तु य: अर्थ: बुध्यते स: साक्षात् बुध्यते । अत: उभयोर्मध्ये भेद: अस्ति, अर्थात् मकरध्वजस्य कोपरूपक: अर्थ: शब्दश्रवणमात्रेण साक्षाद्बुध्यते ।

**प्रकरणम्—**

वक्तृबोद्धबुद्धिविषयत्वं नाम प्रकरणम् । अस्योदाहरणे नागेशभट्ट कथयति 'सैन्धवमानय' इति । अत्र भोजनप्रकरणे सैन्धवम् इत्युक्ते लवणम्, युद्धप्रकरणे सैन्धवशब्द: घोटकं बोधयति इति ज्ञायते । पण्डितराज: कथयति राजानं संबोध्य केनचिद् भृत्येनोक्ते 'सर्वं जानाति देव:' इति वाक्ये देवपदं युष्मदर्थे नियन्त्रितं भवति । अत: नानार्थकशब्दश्रवणानन्तरं तत्तत्प्रकरणानुरोधेन वाच्यार्थस्य बोध: जायते। तदेव प्राकरणिकार्थ: इत्यपि ज्ञायते ।

**लिङ्गम्—**

नानार्थशब्दस्य अर्थान्तरे अवृत्तित्वम् एकशक्यगतत्वम्, साक्षात् शब्दबोध्यत्वं लिङ्गम् इति कथ्यते। यथोदाहरति मम्मटाचार्य: काव्यप्रकाशे- 'कुपितो मकरध्वज:' इति । अत्र नानार्थशब्दस्य मकरध्वजस्य कुपित: इति पदात् य: असाधारण: कोपरूपार्थ: ज्ञायते स: मकरध्वजस्य अर्थान्तरेषु न वर्तते इति। तस्मादत्र लिङ्गबलेन नानार्थकशब्दत: एकार्थे नियन्त्रितो भवति ।

**शब्दस्यान्यस्य सन्निधि: –**

यत्र पदद्वयमध्यात् एकस्य पदस्य सान्निध्यवशात् नानार्थशब्दान्तरस्य अभिधया एकस्मिन्नर्थे नियन्त्रणं भवति तत्र शब्दस्यान्यस्य सन्निधिर्भवति । उदाहरणं यथा- 'करेण राजते नाग:' । अत्र करपदं नागपदयोगेन शुण्ढार्थे नागपदं करपदयोगेन गजे च नियन्त्रितं भवति । अत्र एकं पदं पदान्तरमपेक्ष्यते इति कृत्वा अन्योन्याश्रयदोष: भवतु इति न वाच्यम् । यतो हि समकालमेव पदद्वये शक्तिर्नियम्यते इति कृत्वा नान्योन्याश्रयत्वम् ।

मम्मटादय: आलङ्कारिका: तु 'देवस्य पुराराते:' इति यदुदाहरणम् अन्यस्य शब्दस्य सन्निधे: प्रयच्छन्ति तत् न युक्तम् । यत: नानार्थस्य देवशब्दस्य कस्यचित् राज्ञ: अर्थे, पुरशब्दस्य नगरार्थे च स्वीकृते सति अर्थान्तरे अन्वयस्य उपपत्तित्वात् शक्ते: नियन्त्रणत्वं न भवति ।

यद्युच्यते 'देवस्य त्रिपुराराते:' इति उदाहरणम् अन्यस्य शब्दस्य सन्निधेरुदाहरणमस्तु तर्हि तदपि न युक्तम् । त्रिपुरासुरस्य अरातित्वमादाय देवस्येति पदस्य शिवार्थे असाधारणधर्मबलात् लिङ्गत्वस्य उदाहरणं सम्पद्यते । न तु शब्दस्यान्यस्य सन्निधे: इति ।

**सामर्थ्यम्—**

सामर्थ्यं नाम कारणता इति बोध्यते । यथा- 'मधुना मत्त: कोकिल:' इत्यत्र कोकिलमदजनकतानिमित्तं मधुशब्द: अभिधया वसन्ते नियन्त्रित: भवति, न तु मद्ये । यदि कश्चिद् ब्रूयात् मादकत्वं मधुनि (मद्ये) अपि अस्ति, अत: मधुना मत्त: कोकिल: इति असाधारण-धर्माभावादिदं लिङ्गोदाहरणं न भवेत् । एतन्निरसितुमुच्यते यत् भवतु नाम मधु प्राणिमात्रमादने समर्थम्, परन्तु कोकिलमादने मधु: एव समर्थ: न तु मधु (मद्यम्) अत: असाधारणधर्मतया एतत् लिङ्गस्य उदाहरणं स्यात् । इति पूर्वपक्ष: । प्राणिमात्रमादने मधुन: सामर्थ्यवत्त्वेऽपि कोकिलमादने मधो: सामर्थ्यात् एतदसाधारणधर्मत्वं जातम् । अत: अत्र लिङ्गत्वस्य दुर्वारत्वमायाति एव । अत्र जगन्नाथ: कथयति, यदि एवं युक्तिरुपस्थाप्येत तर्हि सामर्थ्यस्य वाचकतानियामकत्वमसङ्गतं स्यात् । एतस्य समाधाने एतत् वक्तुं शक्यते यत् शाब्दत्व-अशाब्दत्वाभ्याम् एकानेकपदार्थत्वाभ्यां वा लिङ्गसामर्थ्ययोर्मध्ये विशेष: (भेद:) स्यात् । अत्र तात्पर्यमिदं यत् कुपितो मकरध्वज: इति लिङ्गोदाहरणे कोपाश्रयादभिन्न: मकरध्वज: (काम:) इति साक्षात् ज्ञानं जायते । 'मधुना मत्त: कोकिल:' इति सामर्थ्यस्य उदाहरणे कोकिल: स्वयं मदकारणताविषय: न भवति । वाक्यश्रवणानन्तरमेतत् मानसबोधत्वेन जायते इति हेतो: एतत्साक्षान्न शाब्दविषयमस्ति । अयमेव उमयोर्मध्ये भेद: ।

नागेश: उदाहरणमिदम् अर्थनिष्ठसामर्थ्यस्य कृते प्रदर्शयति । शब्दनिष्ठसामर्थ्यस्योदाहरणं तु अभिरूपाय कन्या देया इति वदति । अत्राभिरूपपदेन कन्याया: उद्वाहे सामर्थ्यं प्रकाशितं भवति ।

**औचिती—**

औचिती नाम योग्यता, यथा 'पातु वो दयितामुखम्' अत्र नानार्थविशिष्टस्य मुखशब्दस्य कामार्तानां त्राणकरणे योग्यता वर्तते इति मुखशब्द: साम्मुख्ये नियन्त्रितो भवति । जगन्नाथ: कथयति तस्या: साम्मुख्येन कामार्तानां त्राण: न तु केवलं मुखमात्रेण वैमुख्ये त्राणायोगात् । नागेश: अत्र उदाहरणप्रसङ्गे कथयति–

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यै: सर्वस्य कटुरेव स: ।।

अत्र औचित्यात् परशुना इत्यस्य छेदनार्थत्वम्, मधुसर्पिषा इत्यत्र सेचनार्थत्वम्, गन्धमाल्याद्यै: इत्यस्य पूजनार्थत्वमिति अन्वितं भवति ।

**देश:—**

देश: इत्यत्र नगरादि: इति । देशोऽपि अभिधानियन्त्रणे हेतुर्वर्तते । यथा- भात्यत्र परमेश्वर: । 'अत्र' इति देशबलात् परमेश्वरशब्द: राजनि नियन्त्रितो भवति । परमेश्वरशब्दयोगात् अस्मिन् स्थले भगवत: अर्थ: नियन्त्रितो भवतु इति चेन्न । परमेश्वरस्य सार्वत्रिकत्वात् 'अत्र' इति पदस्य वैयर्थ्यापत्ते: । एवं 'वैकुण्ठे

हरिर्वसति' इति स्थलेऽपि वैकुण्ठाभिधदेशबलात् नानार्थः हरिशब्धः भगवति नियन्त्रितः भवति । अस्मिन् स्थले द्वयोरुदाहरणयोर्मध्ये इदमेव पार्थक्यं यत् प्रथमोदाहरणे परमेश्वरपदेन भगवदर्थस्वीकारे 'अत्र' इति अधिकरणस्य ग्रहणं व्यर्थम्, अन्यत्र वैकुण्ठे हरिर्वसतीति स्थले हरिपदेन सिंहादीनां ग्रहणे तेषामधिकरणभूते वैकुण्ठे स्थितिः अप्रसिद्धेति ।

**कालः—**

अत्र कालपदेन दिवसादिः गृह्यते । 'चित्रभानुर्दिने भाति' इति कथने नानार्थचित्रभानुशब्दस्य दिनरूपककालमाश्रित्य सूर्येऽर्थे नियन्त्रणं भवति । यदि चित्रभानुः भातीति रात्रौ उच्यते तर्हि रात्रिरूपकालमाश्रित्य चित्रभानुशब्दः अग्नौ नियन्त्रितो भवति ।

**व्यक्तिः—**

स्त्री-पुं-नपुंसकलिङ्गानि व्यक्तिपदेन बुध्यन्ते । व्यक्तिरपि अभिधानियन्त्रणे कारणं भवति । यथा- मित्रो भातीति पुंलिङ्गे मित्रशब्दः सूर्ये, मित्रं भातीति नपुंसकमित्रशब्दः सुहृदि नियन्त्रितो भवति । नागेशोऽपि एवमेव वदति। एवमुदाहरणानन्तरं यथा 'नभो भाति' इत्यत्र नपुंसकलिङ्गप्रयोगात् नभः इति आकाशे, नभाः भातीति पुंलिङ्गप्रयोगे नभाः इति शब्दः श्रावणमासे नियम्यते ।

**स्वरः—**

उदात्तादिः स्वरपदेन गण्यते । यथा 'इन्द्रशत्रुर्वर्धस्व' इत्यादिस्थले अन्त्योदात्तरूपेण यदि उच्चारणं क्रियते तर्हि षष्ठीतत्पुरुषसमासे इन्द्रस्य शत्रुः इति विग्रहे इन्द्रस्य घातकः वृत्रासुरः इति अर्थबोध भवति । यदि बहुव्रीहिसमासे इन्द्रः शत्रुः (शातयिता) यस्य इति विग्रहः क्रियते तर्हि आद्यपदस्य इन्द्र इत्यस्य उदात्तत्वबलेन प्राधान्य भवेत् । अतः स्वरोऽपि अभिधानियन्त्रणे कारणं भवति । आचार्य विश्वनाथादयः आलङ्कारिकाः स्वरस्यार्थनियन्त्रणत्वं केवलं वेदे इति स्वीकुर्वन्ति । न तु काव्यादौ । यदि काव्ये स्वरस्यार्थनियन्त्रणत्वं स्वीक्रियते तर्हि एकस्यार्थस्य वाच्यत्वे अर्थान्तरस्य व्यङ्ग्यत्वं प्रसज्येत् । एतेन काव्ये प्रसिद्धस्य श्लेषस्य उच्छेदः स्यात् । श्लेषे हि अर्थद्वयस्य वाच्यत्वं स्वीक्रियते । यदि स्वरस्याभिधानियामकत्वमङ्गीक्रियते तर्हि श्लेषेऽपि एकस्यार्थस्य वाच्यत्वे अपरस्य व्यङ्ग्यत्वात् श्लेषः न स्यात् । अतः काव्यादौ स्वरस्य नियन्त्रणकारित्वं न स्वीक्रियते । अतः उक्तं काव्यमार्गे स्वरो न गण्यते । मम्मटेनाप्युक्तम्– 'न काव्ये स्वरो विशेषप्रतीति कृदिति' ।

**स्वरादयः–**

स्वरादिः इत्यत्र काव्यशास्त्रीयसिद्धान्तानुसारेण स्वरः काव्ये नैव गण्यते। तत्तु वेदादिशास्त्रेषूपयुज्यत एव। अत्र आदिपदेन अभिनयादिः स्वीक्रियते । प्रसङ्गेऽस्मिन् अभिनयपदेन हस्तादिभिः प्रदर्शितः आकारविशेषः ज्ञायते । यथा चोदाहृतं काव्यप्रकाशे-

> एतावन्मात्रस्तनिका एतावन्मात्रैरक्षिपत्रैः ।
> एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ।।८ इति।

अत्र 'एतावन्मात्रस्तनिका' इत्यादिकथनद्वारा हस्तेन कृतः निर्दिष्टः आकारः नियन्त्रितः भवति । अतः आदिपदेन अभिनयग्रहणं भवति ।

एतैः चतुर्दशप्रकारैः नानार्थस्थले शब्दे एकस्मिन्नर्थे निमन्त्रिते सति अर्थान्तरबोधः यया शक्त्या भवति सा शक्तिः अभिधामूलव्यञ्जना इति उच्यते । यथा-

> भद्रात्मनो दुरधिरोहतया विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
> यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ।।९ इति।

अत्र राजरूपकार्थः प्राकरणिकः स राजा भद्रात्मशाली, अर्थात् अत्यन्तमुदारशाली । असौ दुरधिरोहः (परैरनभिभवनीयः) विशालवंशे अस्य जन्मास्ति । शिलीमुखानां (शराणाम्) संग्रहमसौ करोति । अस्य गतिरपि अनुपप्लुता (अनुद्धता) सर्वदा निर्धनेभ्यः धनदानकरणेन अस्य करः आर्द्रः आसीत् । अभिधाव्यापारः भद्रात्मप्रभृतिशब्दानां नियन्त्रणं कृत्वा राजरूपकमर्थं प्रकाश्य यदा विरतः भवति तदा पुनः तत्तच्छब्देभ्यः हस्तिरूपकस्यार्थस्य बोधः अप्राकरणिकरूपेण जायते । असौ अप्राकरणिकार्थः नाभिधाबोध्यः, अपि तु व्यञ्जनाबोध्यः। अतः मम्मटेनोक्तम्- अनेकार्थस्य शब्दस्य यत्क्वचित् अर्थान्तरप्रतिपादनं तत्र नाभिधा, नियमनात्तस्याः । न च लक्षणा मुख्यार्थबाधाद्यभावात् । अपि तु अञ्जनं व्यञ्जनमेव व्यापारः। इति।

अतः उपरोक्तविचारानुसारेण ज्ञायते यत् अनेकार्थकस्य शब्दस्य श्रवणानन्तरं जयमाने अर्थसंशये संयोगादिभिः एकार्थः प्राप्यते। स एवार्थः वाच्यार्थो मुख्यार्थो वा इति कथ्यते। ततः वाच्यार्थव्यतिरिक्तस्यार्थस्य प्रतीतिः अभिधाबलेन नैव सम्पद्यते। तदा तस्यार्थान्तरस्य प्रतीतये अभिधा-लक्षणा-तात्पर्याशक्तिभिः भिन्नायाः व्यञ्जनाशक्तेः आवश्यकता वर्तत इति साहित्यिकानां मौलिकविचारो वर्तते। एवंरूपेण अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रणविचारः संक्षेपेण प्रतिपादितः। इति शम्।।

**सन्दर्भाः**


1. काव्यप्रकाशः- उल्लासः-२, सूत्र-६।
2. साहित्यदर्पणः- २.३ ।
3. काव्यप्रकाशः-२.१९ ।
4. साहित्यदर्पणः-२.१४ ।
5. वाक्यपदीयम्- २.३१५,३१६ ।
6. रसगङ्गाधरः २. पृ-३५ ।
7. काव्यप्रकाशः-२. पृ- ६९ ।
8. काव्यप्रकाशः-२. पृ-७०।